# अन्वितिः-5 शास्त्रज्ञानपरिक्षणप्रविधयः

**डॉ. अमृता कौर**
सहायकाचार्या, शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानं जयपुरपरिसरः
जयपुरम्, राजस्थानम्

संस्कृते यानि शास्त्राणि सन्ति तानि कथं परीक्षणीयानि इति मौखिकं लिखितञ्च परीक्षा स्वीकर्तव्या। वैदिककालाद् ज्ञानस्य परीक्षणाय शुद्धमन्त्रोच्चारणाय च मौखिकरूपेण वेदपाठाः भवन्ति। तथैव प्रहेलिकामाध्यमेन रहस्ययुक्तानां वाक्यानां श्लोकानाञ्च उत्तरेण परिक्षणमपि भवति। श्लोकानां लघु लघु अंशैः समस्यापूर्तिमाध्यमेन साहित्यपरिक्षणं क्रियते। शास्त्राणां कण्ठस्थीकरणं ज्ञानपरिक्षणार्थं शलाकापरीक्षामाध्यमेन आसीत्। वेदानामध्ययनं कथं भवति? तेषां संरक्षणं परिक्षणञ्च कैः प्रविधिभिः भवितुमर्हति इति अत्र प्रस्तूयते ।

## 5.1 वेदपाठाः

वेदरक्षार्थम् वेदास्त्वाचूलमूलं धर्म्यप्रवृत्तिकम्। अतो वेदानां परमोपादेयत्वाद्, अतिशयतममहत्त्वशालित्वाच्च महर्षयस्तान् रक्षितुमपि पूर्णमुपायञ्चक्रुः । वेदा एतावद्दीर्घकालानन्तरमपि लोके समवाप्ताः सन्तीत्यत्र कारणमेव महर्षिकृतः प्रयत्नः। महर्षयो हि वेदरक्षार्थम् प्रकृतिपाठस्योपरि अष्टविकृतीनां व्यवस्थां विदधुः। ताः विकृतयः अधःस्थितेन शलोकेनाभिव्यक्तीक्रियन्ते -

**'जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।**
**अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥'**

### प्रकृतिपाठः

मन्त्राणां प्रकृतोपलब्धः पाठः 'संहितापाठ'-पदेन व्यवह्रियते । अत्र कतिपया एव विकृतयो हि वर्ण्यन्ते । पदच्छेदपूर्वकपाठः 'पदपाठ' इत्युच्यते । क्रमपाठः स भवति यत्र पदपाठगतं प्रतिपदं पूर्वोत्तरपदाभ्यां सङ्गमय्य द्विरुच्चार्यते। जटापाठः स भवति यत्र क्रमपाठम् आलम्ब्य प्रतिपदयुगलं त्रिरुच्चार्यते। एतावान् भेदो यच्छिखायाम् अन्यच्चैकं पदमग्ने संश्लिष्टतां याति। उक्तञ्च -

**'पदोत्तरं जटामेव शिखामार्याः प्रचक्षते।'**

घनपाठो नितरां विलक्षणः क्लिष्टश्च । तत्र पदानाम् आवृत्तिः अनुलोमविलोमक्रमेण आसकृज्जायते। घनस्तु चतुर्विधः भवति। तत्र प्रथमप्रकारको वदति -

**'शिखामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत्। अयं घन इति प्रोक्तः।'**

प्रक्षेप-च्युत-व्यवसादादि-विकारेभ्यः परित्रातुं श्रुतिं पद-क्रम-घनजटादिपाठाः आविष्कृताः । एषां सद्भावेन न श्रुतिषु अद्यपर्यन्तम् अणुमात्रमपि दोषलेशः प्रविष्टो भवितुम् अशकत्। प्रातिशाख्यग्रन्था अपि वेदपाठस्य रक्षणार्थं विरचिता अभूवन्।

**ओषधयः संवदन्ते सोमेन सह राज्ञा ॥ ऋ० १०॥९७॥२२ ॥**

**5.1.1 पदपाठः**

ओषधयः सं। वदन्ते। सोमेन। सह राज्ञा

**5.1.2 क्रमपाठः**

ओषधयः सं। सं वदन्ते। वदन्ते सोमेन। सोमेन सह। सह राज्ञा। राज्ञेति राज्ञा

**5.1.3 जटापाठः**

ओषधयः सं, समोषधयः, ओषधयस्, सम्।

सं वदन्ते, वदन्ते, सं, सं, वदन्ते।

**5.1.4 शिखापाठः**

ओषधयः सं, समोषधय, ओषधयेः सं — वदन्ते।

संवदन्ते, वदन्ते सं, संवदन्ते-सोमेन।

**5.1.5 धनपाठः**

ओषधयः सं, समोषधय ओषधयः संवदन्ते,

वदन्ते समोषधय ओषधयः संवदन्ते ॥

संवदन्ते वदन्ते सं संवदन्ते सोमेन,

सोमेन वदन्ते सं, संवदन्ते सोमेन ॥

अस्य घनपाठस्य परीक्षणेन ज्ञातो भवति यत्, प्रथमपदन्तु पञ्चवारं, द्वितीयपदन्तु दशवारं, तृतीयपदं त्रयोदशवारं, चतुर्थपदमपि त्रयोदशवारं समायाति इति। इयं हि मेधाशक्तेः पराकाष्ठा वर्त्तते। मेधाविनो मुनेः ज्ञानस्योत्कर्ष एवाऽस्ति।

सामवेदस्य मन्त्रस्थस्वराणां गणनासङ्केतस्तु अतीव प्रमाणिकतयैव त्रिविष्टो भवति। अस्मिन् स्वरे स्तोकमपि स्खलनस्य सम्भावना न वर्त्तते। इयं स्वरगणना समीचीनाऽस्ति।

विविधैः वेदपाठैः न केवलं वेदानां संरक्षणं भवितुमर्हति अपितु स्मृतिपरीक्षणमपि सम्भवति। एभिः पाठैः दीर्घकालिकस्मृतेः विकास भवति अतः एते विधयः मनोवैज्ञानिकाधारितास्सन्ति।

## 5.2 प्रहेलिकाः

प्र उपसर्गपूर्वकात् हिल् भावकरणे इत्यस्मात् तुदादिगणस्थात् धातोः इनि कनि टापि च प्रहेलिका शब्दः निष्पद्यते। एकस्मिन् श्लोके वाक्ये कथने च स्थितव्यङ्ग्यरहस्यस्य व्यङ्ग्यस्योद्घाटनेन तस्य व्यङ्ग्यश्लोकस्य सार्थकोत्तरं प्राप्यते।

काव्यशास्त्रस्य भेदौ वर्तते - प्रबन्धकाव्यं मुक्तककाव्यञ्चेति। प्रबन्धकाव्ये यत्र कस्यचित् नायकस्य चारित्र्यस्य अवलम्बनं कर्तुं पूर्वापरप्रसङ्गै: अर्थावगमनं क्रियते, तत्रैव मुक्तककाव्ये पूर्वापरप्रसङ्गै: विनैव अर्थस्य पर्यवसानं जायते। भर्तृहरे: शतकत्रयं मुक्तककाव्यपरम्परायाम् अत्यन्तं प्रसिद्धोदाहरणरूपेण वक्तुं शक्यते। मुख्यतया मुक्तककाव्यस्य पञ्च भेदास्सन्ति, यथा हि –

1. शुद्धमुक्तकम् - शृङ्गारसम्बद्धं मुक्तवृत्तम्।
2. कथोत्थमुक्तकम्- ऐतिहासिककथया सम्बद्धं मुक्तवृत्तम्।
3. संविधानकमुक्तकम् - सम्भावितघटनया सम्बद्धं मुक्तवृत्तम्।
4. आख्यानकवन्मुक्तकम् - परिकल्पितघटनया सम्बद्धं मुक्तवृत्तम्।
5. चित्रमुक्तकम् - सप्रपञ्चं मुक्तवृत्तं समस्यापूर्ति: प्रहेलिका वा कूटचित्राणि वा।

अत्र पञ्चमप्रकारस्य कृते विशेषावधानं प्रदाय चित्रमुक्तकानां प्रहेलिकानां विषये प्रस्तुतिः अत्र क्रियते। "कष्टं काव्यमेतदितिदिङ्गमात्रं प्रदर्श्यते"। (काव्यप्रकाशः 9/328) अनेन

स्पष्टं लिखितं वर्तते यत् एतत् कष्टं काव्यं दिशानिर्देशनं करोति। प्रहेलिकायाः षड् भेदास्सन्ति - च्युताक्षर, दत्ताक्षर, च्युतदत्ताक्षर, अक्षरमुष्टिका, बिन्दुमती, अर्थप्रहेलिका।

आधुनिककाले प्रहेलिकाः शास्त्राणां ज्ञानपरीक्षणाय एव न अपितु शास्त्रावबोधपरीक्षणाय च साहाय्यमाचरन्ति । शास्त्रयुक्ताः प्रहेलिकाः समस्यारूपेण संस्थाप्य उचितसमाधानं कृत्वा शास्त्रपरीक्षणं भवति। NCERT पाठ्यपुस्तके एकः पाठः प्रहेलिकायुक्तः वर्तते। तस्मात् ज्ञायते यत् प्रहेलिकायाः प्रयोगः प्राथमिकस्तरात् उच्चस्तरपर्यन्तं कर्तुं शक्यते।

**5.3 समस्यापूर्तिः**

भारतीयसाहित्ये दण्डिना रचितस्य काव्यादर्शस्य चतुःषष्टिकलासु समस्यापूर्तिः अन्तर्भवति। कस्यचिद् श्लोकस्य वाक्यस्य कथायाः वा एकं पादं विलिख्य सम्पूर्णश्लोकेन समाधानेन समस्यापूर्तिः क्रियते। समस्यापूर्ति माध्यमेन सर्जनात्मकतायाः विकासः भवति। प्राथमिकस्तरे सरलतया वाक्यनिर्माणार्थम् अस्य परीक्षणस्य प्रयोगः भवति। पुराकाले शास्त्रार्थाय तर्क-वितर्काय च प्रयोग दृश्यते स्म। विधावस्मिन् संस्कृतभाषासम्बद्धः विषयः अपूर्णप्रश्नत्वेन दीयते। तस्य प्रश्नस्य सम्पूर्णोत्तरं लेखितुं स्वविचाराः संस्कृते प्रकटनीयाः भवेयुः। अपूर्णांशान् व्यक्तिगतरूपेण सामूहिकरुपेण वा प्रस्तूयते अनेन छात्राणां बौद्धिकविकासो अपि भवति। कस्यापि प्रश्नस्योत्तररूपेण जनानामनुभवाः एव स्वबुद्धिकौशलत्वेन व्यवस्थितविचारत्वेन आविष्कृताः भवन्ति । यथा- वाक्यसमस्यापूर्तिः कर्ता ........... ............।

श्लोकसमस्यापूर्तिः - आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम्।

..................................................॥

अस्य प्रयोगः पूर्वपाठितस्य विषयस्य ज्ञानपरिक्षणाय क्रियते तेन तस्य विषयस्य ज्ञानं दीर्घकालपर्यन्तं बुद्धौ तिष्ठति। अतः समस्यापूर्तिविधेः प्रयोगः मनोवैज्ञानिकाधारेण स्मृतिपरीक्षणाय बुद्धिपरिक्षणाय शास्त्रज्ञानपरीक्षणाय च क्रियते।

## 5.4 शलाका

उच्चस्तरीयमूल्याङ्कनप्रविधिः (higher order evaluation technique) भवति शलाकापरीक्षा । एकस्य व्यक्तिविशेषस्य अत्यन्ततीक्ष्णबुद्धेः, स्मरणशक्तेः, अवधानस्य, विषयपरिज्ञानस्य, अवबोधनक्षमतायाः, चिन्तनशक्तेः, तार्किकशक्तेः, अध्ययनपरम्परायाः च परीक्षणार्थमनुप्रयुज्यमानः परीक्षणविधिः शलाका । इयं परीक्षा प्रतिभाशालिनां छात्राणां प्रतिभायाः परीक्षणेन साकं शास्त्रे नैपुण्यतायाः अपि परीक्षणार्थमुपयुज्यते।'शल' वेगे इत्यस्मात् धातोः आकच् प्रत्यये सति (उणादिकोशः-4.15) शलाका इति शब्दः निष्पद्यते । शलाका इत्यस्य अक्षक्रिया, द्यूतकर्म, शरः, अस्थि, मदनवृक्षः इत्यादयः अर्थाः यद्यपि सन्ति तथापि सत्सु बहुष्वर्थेषु सन्दर्भेऽस्मिन् शलाकाशब्दस्य अर्थः – सूक्ष्मलोहाग्रोदण्डः/तीक्ष्णलोहदण्डः/तीक्ष्णकाष्टदण्डः/ शरः अन्यथा आलेख्यकुञ्चिका इति वा स्वीक्रियते । शलाकया परीक्ष्यते ज्ञानम् इति शालाकापरीक्षा । परीक्षा नाम तर्कप्रमाणादिना वस्तुतत्वावधारणम् इति । अतः विभिन्नैः तर्किकैः प्रणाणैः शलाकाद्युपकरणैः च एकस्य बुद्धेः सीमायाः अवधारणम् अथवा अभिज्ञानमेव शलाकापरीक्षा भवति ।

अतिप्राचीनकालतः छात्रैरधीतविषयस्य ज्ञनस्य वा परीक्षणार्थं नैकविधपरीक्षाः क्रियन्ते स्म । विद्वत्सभासु, राजसभासु, विद्यापीठेषु एवमेव इतरत्र च छात्रैः कण्ठस्थीकृतानां सुष्ठु अधीतानां काव्यानां, शास्त्राणां, वेदभागानाम्, अधीतग्रन्थानां वा विषयपरीक्षणं शलाकापरीक्षया परीक्षकाः कुर्वन्ति स्म । विशिष्य उत्तरभारते प्राचीने मिथिलक्षेत्रे स्नातकोपाधेः प्रदानार्थम् अन्तिमपरीक्षारूपेण शलाकापरीक्षा एव क्रियते स्म इति तिबेत् वासिनः धर्मस्वामी इत्यस्य उल्लेखादभिज्ञायते । वर्तमाने काले स्पर्धाः शलाकापरीक्षया चाल्यन्ते । अस्मिन् क्रमे राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं दिसम्बर् / जनवरि मासे वा अखिलभारतीयशास्त्रस्पर्धारूपेण अधीतशास्त्रस्य परीक्षणार्थं शलाकापरीक्षाः क्रियन्ते स्म । तथैव संस्कृतभारती इति संस्थापक्षतः एवमेव उत्तराखण्डसंस्कृत-अकादमीपक्षतः अपि शलाकापरीक्षाः विधीयन्ते । विभिन्नशास्त्रेषु छात्राणां प्रतिभायाः परीक्षणार्थं विभिन्नाः विद्यासंस्थाः पौराणिकसंस्थाः च स्वक्षेत्रस्तरे राज्यस्तरे वा शलाकापरीक्षां चालयन्ति स्म ।

**5.4.1. शलाकापरीक्षायाः उद्देश्यानि –**

- शास्त्रस्य शास्त्रपरम्परायाश्च परिरक्षणम् ।
- छात्रेषु प्रतिभायाः अभिज्ञानम् उत जागरणम् ।
- मस्तिष्कस्य चिन्तनाशक्तेः धारणाशक्तेश्च अभिवर्धनम् ।
- भाषासामर्थ्यसम्पादनम् ।
- प्रत्येकं ग्रन्थस्य शास्त्रस्य वा निगूढं तलस्पर्शिज्ञानसमुपार्जनम् ।
- उच्चस्तरीयमूल्याङ्कनप्रक्रियायाः संरक्षणम् ।
- छात्राणां सर्वतोमुखविकाससम्पादनं तथा तस्य विकासस्य मूल्याङ्कनम् ।
- भारतीयमूल्याङ्कनप्रणालीनां परिरक्षणम् ।

**5.4.2. शलाकापरीक्षायाः स्वरूपम् –**

केनचित् मध्यस्थेन पुरुषेण काचिदयश्शलाका अथवा काष्ठशलाका एकस्य पूर्वनिर्धारितस्य तालपत्रग्रन्थस्य अथवा पुस्तकस्य पत्राणां मध्ये यत्र कुत्रापि निक्षिप्यते । ततः ग्रन्थमुद्घाट्य तस्मिन् पत्रे स्थितः विषयः छात्रेण धाराप्रवाहरूपेण विनास्खालित्यं स्मर्तव्यः वक्तव्यः व्याख्यातव्यः विश्लेष्टव्यश्च । केचन पण्डिताः अकथयन् यत् कांश्चित् तीक्ष्णाम् अयश्शलाकाम् उपरिष्ठात् ग्रन्थस्योपरि अथवा तालपत्रस्योपरि क्षिप्यते । तस्मिन् ग्रन्थे शलाकासूची यस्मिन् स्थाने अथवा पुटे उत पत्रे रन्ध्रं कुर्वती स्थगिता भवति तत्र विद्यमानविषयः श्रावणीयः आहोस्वित् व्याख्यातव्य इति। परमस्य औचित्यं न दृश्यते यतः कदापि शलाकया ग्रन्थस्य नाशः नैव क्रियते । यदि एवमेव वारं वारं ग्रन्थे च्छिद्रं भवति तर्हि ग्रन्थः नश्यति । अतः ग्रन्थे शलाकायाः निवेशनमेव समुचितमिति भाति । अस्मिन् क्रमे शलाकापरीक्षायाः स्वरूपमित्थं विद्यते ।

**परीक्षायाः पूर्वसन्नाहः (अध्येतुः कर्तव्यानि)** –

छात्रेण पूर्वनिर्धारितस्य कस्यचन शास्त्रस्य ग्रन्थभागस्य समग्रतया (न तु अंशतः) अध्ययनं गुरोसकाशात् अथवा अन्यप्रकारेण वा सुष्ठु कार्यम् । अध्येता ग्रन्थस्य निर्दिष्टभागस्य सर्वाः पङ्क्तीः कण्ठस्थीकुर्यात् । ग्रन्थपङ्क्तीनां विशदं व्याख्यानं कर्तुं सामर्थ्यं सम्पादयेत् । निर्दिष्टे ग्रन्थभागे विद्यमानविषयेषु गहनशास्त्रचर्चां कर्तुमपि कौशलं सम्पादयेत् । अयं कालः स्वाध्यायकालः भवति ।

**परीक्षाविधानम्** – शलाकापरीक्षायां निर्दिष्टग्रन्थम् अधीतवतः प्रत्येकम् अध्येतुः परीक्षणं त्रिधा क्रियते । अन्यप्रकारेण वक्तव्यं चेत् शलाकापरीक्षेयं त्रिस्तरीया भवति यत्-

1. स्मरणशक्तेः/धारणाशक्तेः परीक्षणम् ।
2. ग्रन्थपङ्क्तेः व्याख्यानसामर्थ्यपरीक्षणम् ।
3. विशिष्टज्ञानपरीक्षणम् /शास्त्रचर्चा/निशितपरीक्षणम् ।

स्तरत्रयस्यास्य परीक्षणविधेः स्वरूपविवरणमधः प्रदर्श्यते ।

I. **प्रथमः स्तरः/घट्टः (स्मरणशक्तेः/धारणाशक्तेः परीक्षणम् )** –

स्मृतिस्तरस्य परीक्षणमत्र क्रियते । पूर्वनिर्धारितग्रन्थस्य नियतपाठक्रमेण कण्ठस्थीकरणानन्तरं स्तरे अस्मिन् प्रज्ञायाः परीक्षणमित्थं क्रियते -

- परीक्षकैः शलाकया उद्धृतात् स्थानात् एका ग्रन्थपङ्क्तिः उच्चार्यते । ततः आरभ्य छात्रेण अग्रिमपङ्क्तयः श्रावणीयाः । यावत् परीक्षकाः स्थगयितुं न सूचयेयुः तावत् पर्यन्तं पूर्णः ग्रन्थः श्रावणीयः।
- परीक्षकेषु एकैकः अपि एकस्य छात्रस्य एतादृशपरीक्षणम् अन्यूनं त्रिवारं कुर्यात् । (छात्रसंख्यां, समयं च अनुसृत्य परीक्षकाः ततोऽधिकप्रश्नान् अपि कर्तुमर्हन्ति)।
- प्रतिवारमपि परीक्षकैः शलाकया एव प्रश्नस्थानानि उद्घाटयिष्यन्ते ।

वस्तुतः विनास्खलनं पूर्णग्रन्थस्य कण्ठोपाठः न तु सामान्यः विषयः तदर्थं महन् परिश्रमः विधेयः। सन्दर्भेऽस्मिन् स्मरणशक्तेः अभिवर्धनार्थं दीर्घकालिकस्मृतेः सम्वर्धनार्थं च कतिपयाः मनोवैज्ञानिकोपायाः सूच्यन्ते -

स्मरणप्रक्रिया(memorization) संज्ञानात्मकतंत्रिकाविज्ञानान्तर्गता (cognitive neuroscience) विद्यते। तैत्तरीयसंहितायां प्रोक्तं यत् – वयभ्यः वाग्वादनारम्भात् प्राग् (पक्षिणां कलकलरवस्य आरम्भात् प्राक् ) स्वाध्यायः अध्येतव्यः इति। अतः छात्राः यदि ब्राह्मी मूहूर्ते स्वाध्यायं कुर्युः तर्हि स्मृतिपटले अधीतविषयः स्थायीरूपेण तिष्ठति । एवमेव कण्ठस्थीकरणप्रविधयः इत्थं सन्ति –

1. रटनाधिगमः (Rote learning) यथा आचार्यात् गृहीतं वेदवाक्यं पाठरूपेणैव पौनःपुन्येन वाचनम्/पठनम्।
2. विरामावृत्तयः (Spaced repetition) किंचिद् विरामं प्रदाय अधीतस्यैव विषयस्य पुनरावृत्तिः।
3. स्मृतिसहायकशब्दाः/स्मृतिसाहचर्यम्(A mnemonic/A mnemonic link system) अर्थात् पुनः स्मर्तुं कतिपयानि चिह्नानि स्थापयति। यथा महाभाष्ये इमानि च पुनः शब्दानुशासनस्य प्रयोजनानि - तेऽसुराः । दुष्टः शब्दः। यदधीतम् । यस्तुप्रयुङ्क्ते । अविद्वांसः ......सुदेवोऽसि वरुण इति। इति प्रत्येकं विषयस्य प्रथमपदं एकत्र योजति तद्वत् स्मृतिचह्नानि स्थापयति। कथावत् शब्दसाहचर्यं (word association)।
4. क्रियात्मकानुस्मरणम् (Active recall) – क्रियया सह विषयस्य अनुबन्धनम् । उदाहरणार्थं वेदाध्ययनपरम्परायां पद- क्रम-जटा-माला-शिखा-रेखा-ध्वज-घनाः इति पाठप्रकारा इव पङ्क्तीनां रटनमपि क्रियते स्म। यदि तत्र स्वरोपि संयोज्यते चेत् रटनं सरलं भवति।
5. हिमकन्दुकवदधिगमः (Snowball learning system) – हिमकन्दुकः प्रथमं लघु भूत्वा वृत्ताकाररूपेण परिवर्तयन् अधः पतनसन्दर्भे यथा बृहदाकारं प्राप्नोति तद्वत्

किंचित् किंचित् विषयस्य कण्ठस्थीकरणे वर्धनम्। प्रायः अमुमेव peg system अपि केचन वदन्ति। यथा 1-10, 1-100, 1-1000...

6. कटपयादिसंख्याक्रमः – दीर्घसंख्यानां स्मरणार्थमुपयुज्यते।
7. उपासना एवं धारणा – एकस्मिन् बिन्दौ मनसः निर्बन्धनम्। एकाग्रतायाः सम्पादनम्। चित्तवृत्तीनां निरोधनम् इत्यादिसर्वमपि स्मरणशक्तेः साधनानि एव भवन्ति।

II. द्वितीयः स्तरः/घट्टः (ग्रन्थपङ्क्तेः व्याख्यानसामर्थ्यपरीक्षणम्)(चिन्तनस्तरः) –

अर्थज्ञानसून्यं ज्ञानं निरर्थकं भवति यतः यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥ इति भाष्योक्तदिशा अनर्थज्ञः पाठकाधमः भवति। अतः शलाकायां द्वितीयस्तरः चिन्तनस्तरः विद्यते। अयं कालः प्रवचनकालः। अस्मिन् परीक्षणप्रक्रिया एवं स्यात् -

- परीक्षकैः शलाकया उद्घाटितस्थानात् ग्रन्थपङ्क्तिरेका उच्चार्यते। तस्याः पङ्क्तेः विशदं व्याख्यानं छात्रः कुर्यात्। छात्रस्य एतादृशं परीक्षणम् एकैकः अपि परीक्षकः अन्यूनं त्रिवारं कुर्यात्। परीक्षकैः प्रतिवारं शलाकया एव प्रश्नस्थानानि चेतव्यानि।

अत्र टीका-भाष्य-व्याख्यादि ग्रन्थाः गुरुसुश्रूषया अध्येतव्याः भवन्ति। ग्रन्थस्य रसः अनेनैवाभिज्ञायते। अन्यथा स्थाणुरयं भारहरः इव शिक्षायाः प्रयोजनं न सिध्यति।

III. तृतीयः स्तरः/घट्टः (विशिष्टज्ञानपरीक्षणम्/शास्त्रचर्चा/निशितपरीक्षणम्) -

अयं स्तरः अवबोधस्तरः। श्रवण-मनन-निदिध्यसनपुरस्सरं शास्त्रमध्येतव्यम्। अधीतस्य शास्त्रस्य मर्मपरीक्षणम् अस्मिन् चक्रे भवति। व्यवहारकालः अयं शास्त्रस्य व्यावहारिकं पक्षमत्र परीक्ष्यते यथा -

- विशेषावगतिपरीक्षणचक्रे अस्मिन् परीक्षकाः शलाकया उद्धृते स्थाने विद्यमाने विषये गहनप्रश्नान् कुर्युः। छात्रेण सह शास्त्रचर्चां वा कुर्युः। छात्रेण

प्रदत्तसमाधानमनुसृत्य उपप्रश्नान् अपि परीक्षकाः प्रष्टुमर्हन्ति । येन छात्रस्य ग्रन्थावगतेः स्तरः निर्णीतः भवति । एकवारं कृत-प्रश्नोप्रस्न-शास्त्रचर्चादीनां समाधानात् परं पुनः शलाकया ग्रन्थमुद्घाट्य द्वतीयवारम् एवमेव प्रश्नोपप्रश्नचर्चादिकं भवेत् ।

अनया रीत्या यावदपेक्षितं बहुवारम् परीक्षकाः प्रश्नान् कुर्युः । त्रिष्वपि घट्टेषु छात्रेण स्वीयं प्रतिभायाः सामर्थ्यस्य च प्रदर्शनं कुर्यात् । अन्यथा भागग्रहणम् अपूर्णं भवेत् । प्रायः प्रथमस्तरे उत्तीर्णान् एव द्वितीयस्तरं प्रति प्रेषयेयुः। ये द्वितीयस्तरे उत्तीर्णाः भवन्ति ते एव तृतीयस्तरं प्रति गच्छेयुः ।

**शलाकापरीक्षायाः न्यूनताः -**

- कदाचित् छात्राणां भाग्यवशात् अधीतः सरलः विषयः यदि शलाकया प्राप्तः चेत् भाग्यम् अन्यथा छात्राणां मनसि खेदमुत्पद्येत।
- अस्याः परीक्षायाः मौखिकत्वात् स्मरणशक्तेः अभावे छात्राः पराजिताः स्युः।
- धैर्यहीनाः, लज्जालवाः, सभाकम्पयुक्ताः छात्राः अधीतस्य विषयस्योपस्थापने असमर्थाः भवेयुः।
- एषा परीक्षा केवलं प्रतिभावतां छात्राणां कृते एव भवति । नतु सामान्यबुद्धियुक्तानां छात्राणाम्।
- उत्तमगुरोः अभावे एतादृशपरीक्षासु भागग्रहणमेव कष्ठकरं भवति।

**शलाकापरीक्षायाः गुणाः -**

- एषा उत्कृष्टमूल्याङ्कनप्रणाली।
- मनोवैज्ञानिकी परीक्षा पद्धतिः।
- छात्रेषु प्रतिभां जागरयति।
- छात्रेषु स्पर्धाबुद्धिं जनयति।
- शास्त्रपरिरक्षणे परिपोषणे च परीक्षाप्रणालीयम् अत्यन्तमुपयुक्तकरी।
- पूर्णरूपेण प्राचीनभारतीयपरीक्षाप्रणाली इयम्।
- छात्राणां शैक्षिकसर्वतोमुखविकासायात्यन्तमुपयुज्यते।

इत्थं शास्त्राधिगमस्य परिरक्षणार्थम् शलाकापरीक्षा एका उत्तमा मूल्याङ्कनप्रक्रिया राराज्यते। शलाकापरीक्षायाः चालनेन छात्राणां सम्पूर्णं ज्ञानं परीक्षितुं शक्यते। अत्र प्रथमस्तरे स्मृतेः परीक्षणं, द्वितीयस्तरे छात्राणां वाक्यानामर्थानुसन्धानक्षमतायाः परीक्षणं, युक्तिपरीक्षणं

तृतीये स्तरे च क्रियते । अत्र प्रतिदिनमभ्यासः श्रवणं मननं इत्यादिभि प्रक्रियाभिः स्मरणशक्तिः अभिवर्धनीया । प्रायः एतदेव प्रोक्तं पञ्चदश्यामाचार्यैः यत् –

वाक्यैस्तदर्थानुसन्धानं श्रवणं भवेत् ।
युक्त्या सम्भावितत्वानुसन्धानं मननं तु तत् ॥
ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत् ।
एकतानत्वमेतद्धि निदिध्यासनमुच्यते ॥पंचदशी 1. 43-44 ॥

शास्त्राणां ज्ञानपरिक्षणाय एते प्रविधयः स्मृतिशक्तिमभिवर्धयन्ति इति वेदपाठैः प्रमाणीक्रियते। क्रीडामाध्यमेन अवबोधपरिक्षणाय प्रहेलिकानां प्रयोग साहाय्यमाचरति। सर्जनात्मकतायाः परिक्षणं समस्यापूर्तिमाध्यमेन भवति। शलाकया ज्ञानात्मकम् अवबोधात्मकञ्च परीक्षणं क्रियते। एतेषां प्रविधीनां प्रयोगेण सर्वविधशास्त्राणां परिक्षणं भवति ।